नारद उवाच ।।
ततस्त्वहं चिंतयामि कथं स्थानमिदं भवेत् ।।
ममायत्तं यतो राज्ञां भूमिरेषा सदा वशे ।। १

यत्त्वहं धर्मवर्माणं गत्वा याचे[1] ह मेदिनीम्[2] ।।
अर्पयत्येव स च मे याचितो न पुनः[3] परः ।। २

तथा हि मुनिभिः प्रोक्तं द्रव्यं त्रिविधमुत्तमम् ।।
शुक्लं मध्यं च शबलमधर्मं कृष्णमुच्यते ।। ३

श्रुतेः संपादनाच्छिष्यात्प्राप्तं शुक्लं च कन्यया ।।
तथा कुसीदवाणिज्यकृषियाचितमेव च ।। ४

शबलं प्राप्यते सद्भिर्द्यु तचौर्येण साहसैः ।।
व्याजेनोपार्जितं यच्च तत्कृष्णं समुदाहृतम् ।। ५

शुक्लवित्तेन यो धर्मं प्रकुर्याच्छ्रद्धयान्वितः ।।
तीर्थे पात्रे[4] समासाद्य देवत्वे तत्समश्नुते ।। ६

राजसेन च भावेन वित्तेन शबलेन च ।।
प्रदद्यौद्दो नमर्थिभ्यो मानुष्यत्वे तदश्नुते ।। ७

---

१ अ. ब याचामि
२ ब मेदिनी
३ अ परंपुनः ।।
४ ब पात्रे

तमोवृतस्तु यो दद्यात्कृष्णवित्तेन मानवः ।।
तिर्यक्त्वे तत्फलं प्रेत्य समश्नाति नराधमः ।। ८

तत्तु याचित‿द्रव्यं मे राजसं हि स्फुटं भवेत् ।।
अथ ब्राह्मणभावेन नृपं या चे प्रतिग्रहम् ।। ९

तदप्यहो चातिकष्टं हेतुना तेन मे मतम् ।।
अयं प्रतिग्रहो घोरो मध्वास्वादो विषोपमः ।। १०

प्रतिग्रहेण संयुक्तं[1] ह्यमीवमाविशेद्द्विजम् [2] ।।
तस्मादहं निवृत्तश्च पापादस्मात्प्रतिग्रहात् ।। ११

ततः केनाप्युपायेन द्वयोरन्यतरेण तु[3] ।।
स्वायत्तं स्थानकं कुर्म एतत्संचिंतये मुहुः ।। १२

यथा कुमार्यः पुरुषाश्चिन्तार्तं न प्रपद्यते ।।
तथैव विमृशंश्चाहं चिंतार्तं न लभाम्यणु ।। १३

एतस्मिन्नन्तरे पार्थ स्नातुं तत्र समागताः ।।
बहवो मुनयः पुण्ये महीसागर‿संगमे ।। १४

---

१ अ, ब सुयुक्तौ
२ अ जीवराशिं विशे द्विजः ।।
ब जीव राशी वसेत् द्विजः ।।
३ अ च

अहं तानब्रवं सर्वान्कुतो यूयं समागताः ॥
ते मामूचुः प्रणम्याथ सौराष्ट्रविषये मुने ॥ १५

धर्मवर्मेति नृपतिर्योऽस्य देशस्य भूपतिः ॥
स तु दानस्य तत्त्वार्थी तेपे वर्षगणान्बहून् ॥ १६

ततस्तं प्राह खे वाणी श्लोकमेकं नृप शृणु ॥
द्विहेतुं षडधिष्ठानं षडंगं च द्विपाकयुक् ॥ १७

चतुः प्रकारं त्रिविधं त्रिनाशं दानमुच्यते ॥
इत्येकं श्लोकमाभाष्य खे वाणी विरराम ह ॥ १८

श्लोकस्यार्थं नावभाषे पृच्छ्यमानापि नारद ॥
ततो राजा धर्मवर्मा पटहेनान्वघोषयत् ॥ १९

यस्तु श्लोकस्य[1] चैवास्य लब्धस्य तपसा मया ॥
करोति सम्यग्व्याख्यानं तस्यै[2] चैतद्ददाम्यहम् ॥ २०

गवां च सप्त नियुतं[3] सुवर्णं तावदेव तु[4] ॥
सप्त ग्रामान्प्रयच्छामि श्लोक व्याख्यां करोति यः ॥ २१

---

१ ब लोकस्य
२ ब तस्यै
३ ब निलक्षं
४ अ च ॥

पटहेनेति नृपतेः श्रुत्वा शक्तो वचो महत्[1] ।।
आजग्मुर्बहुदेशीया ब्राह्मणाः कोटिशो मुने ।। २२

पुनर्दुर्बोधविन्यासः श्लोकस्तै विप्र पुंगवैः ।।
आख्यातुं शक्यते नैव गुडोमूकैर्यथा मुने ।। २३

वयं च तत्र याताः स्मोधनलोभेन नारद ।।
दुर्बोधत्वान्नमस्कृत्य श्लोकं चात्र समाश्रिताः ।। २४

दुर्व्याख्येय स्त्वयं श्लोको धनं लभ्यं न च वैनः ।।
तीर्थयात्रां कथं यामीत्येवाचिंत्यात्र चागताः[2] ।। २५

एवं फाल्गुन तेषां तु वचः श्रुत्वा महात्मनाम् ।।
अतीव संप्रहृष्टोऽहं तान्विसृज्येत्य चिंतयम् ।। २६

अहो प्राप्त[3] उपायो मे स्थानप्राप्तौ न संशयः ।।
श्लोकं व्याख्याय नृपतेर्लप्स्ये स्थानं धनं तथा[4] ।। २७

विद्यामूल्येन नैवं च याचितः[5] स्यात्प्रतिग्रहः ।।
सत्यमाह पुराणर्षिर्वासुदेवो जगद्गुरुः ।। २८

---

१ अ, ब महन् ।।
२ अ याती
३ ब मास । परंतु मुद्रित पुस्तके "प्राप्त" इति स्यात् ।
४ ब तदा
५ अ याचितं

धर्मस्य यस्य श्रद्धा स्यान्न च सा नैव पूर्यते ।।
पापस्य यस्य श्रद्धास्यान्न च सापि नपूर्यते ।। २९

एवं विचिंत्य विद्वांस प्रकूर्वंति[1] वृथा रुचि[2] ।।
सत्यमेतद्विभोर्वाक्यं न दुर्लभोऽपि यथा हि मे ।। ३०

मनोरथोऽयं सफलैः[3] संभूतोऽङ्कुरितः स्फुटम् ।।
एनं च दुर्विदं श्लोकमहं जानामि सुस्फुटम् ।। ३१

अमूर्तैः पितृभिः पूर्वमिष्टा ख्यातो हि मे पुरा ।।
एवं हर्षान्वितः पार्थ संचिंत्याऽहं ततो मुहुः ।। ३२

प्रणम्य तीर्थं चलितो महीसागरसंगमम् ।।
वृद्धब्राह्मणरूपेण ततोऽहं यातवान्नृपम् ।। ३३

इदं भणितवानस्मि श्लोकव्याख्यां नृप शृणु ।।
यत्ते पटहविख्यातं दानं च प्रगुणीकुरु ।। ३४

एवमुक्ते नृपः प्राह प्रोचुरेवं हि कोटिशः ।।
द्विजोत्तमाः पुनर्नास्य प्रोक्तुमर्थो हि शक्यते ।। ३५

---

१ अ. ब प्रकुर्वतु
२ अ रुचिः
३ अ, सफलैः

कश्चिद्धेतु षडाख्यातान्यधिष्ठानानि कानि च ।।
कानि चैव षडंगानि कौ द्वौ पाकौ तथा समृतौ[1] ।। ३६

[2]के च प्रकाशश्चत्वारः किंस्वित् त्रिविधं द्विज ।।
त्रयो नाशाश्च के प्रोक्ता दानस्यैतत्स्फुटं वद ।। ३७

[3]स्फुटान्प्रश्नानि मान्सप्त यदि वक्ष्यसि ब्राह्मण ।।
ततो गवां सप्तनियुतं सुवर्णं तावदेवतु ।। ३८

सप्त ग्रामांश्च दास्यामि नो चेद्यास्यामि स्वं गृहम् ।।
इत्युक्त वचनं पार्थ सौराराष्ट्र स्वामिनं नृपम् ।। ३९

धर्मवर्माणमस्त्वेवं प्रावोचमवधारय ।।
श्लोकव्याख्यां स्फुटां वक्ष्ये दानहेतू च तौ[5] शृणु ।। ४०

अल्पत्वं वा बहुत्वं वा दानस्याभ्युदयावहम् ।।
श्रद्धाशक्तिश्च दानानां वृद्धय क्षयकरे हि ते ।। ४१

[6]तत्र श्रद्धाविषये श्लोका भवन्ति ।।
कार्यक्लेशैश्च बहुभिर्न चैवार्थस्य राशिभिः ।। ४२

---

१ ब स्मतौ
२ अ, ब के प्रकाशश्च अत आरंभ्यते ।
३ अ, ब स्फुटानि माम सप्त प्रश्नान् अत आरंभ्यते ।
४ ब चेत
५ ब प्रतौ "द्वौ" इतिस्यात्
६ अ प्रतौ इत्ययं श्लोकः नास्ति । तत्र -- भवंति

धर्मः संप्राप्यते सूक्ष्मः श्रद्धा धर्मोऽद्भुतं तपः ।।
श्रद्धा स्वर्गश्च मोक्षश्च श्रद्धा सर्वमिदं जगत् ।। ४३

सर्वस्वं[1] जीवितं चापि दद्यादश्रद्धया यदि ।।
नाप्नुयात्सफलं किंचिच्छ्रद्धानस्ततो भवेत् ।। ४४

श्रद्धया साध्यते धर्मो महद्भिर्नार्थ राशिभिः ।।
अकिंचना हि मुनयः श्रद्धावतो दिवंगताः ।। ४५

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।।
सात्विकी राजसी चैव तामसी चेति तां श्रृणु ।। ४६

यजंते सात्विका देवान्यक्षर क्षांसि राजसाः ।।
प्रेतान्भूतपिशाचांश्च यजंते तामसा जनाः ।। ४७

तस्माच्छ्रद्धावता पात्रे देतं न्यायार्जितं हि यत् ।।
तेनैव भगवान्रुद्रः स्वल्पकेनापि तुष्यति ।। ४८

कुटुंबभुक्त[2] वसनाद्देयं यदतिरिच्यते ।।
मध्यास्वादी विषं पश्चाद्दातुर्धर्मोऽन्यथा भवेत् ।। ४९

---

१ अ. ब. सर्वस्वं
२ अ. ब भक्त

शक्ते परजने दाता स्वजने दुःख जीविनि ।।
मध्यापान विषादः स धर्माणां प्रतिरूपक : ।। ५०

भृत्यानामुपरोधेन यत्करोत्यौर्ध्व देहिकम् ।।
तद्भवत्य सुखोदर्कं जीवतोऽस्य मृतस्य च ।। ५१

सामान्यं याचितं न्यासमाधिदराश्च दर्शनम् ।।
अन्वाहितं च निक्षेपः सर्वस्वं चान्वये सति ।। ५२

आपत्स्वपि न देयानि नववस्तूनि पंडितैः ।।
यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः ।। ५३

इति ते गदितौ[1] राजन्द्वौ हेतुश्रूयतामतः ।।
अधिष्ठानानि वक्ष्यामि षडेव शृणु तान्यपि ।। ५४

धर्ममर्थं च कामं च ब्रीडा[2] हर्ष भयानि च ।।
अधिष्ठानानि दानानां षडेतानि प्रचक्षते ।। ५५

पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम् ।।
केवलं धर्म बुद्धया यद्धर्मदानं तदुच्यते ।। ५६

---

१ ब गदिते
२ अ.ब्र ब्रीडा

51

धनिनं धनलोभेन लोभयित्वार्थमाहरेत् ॥
तदर्थं दानमित्याहुः कामदानमतः शृणु[1] ॥ ५७

प्रयोजनमपेक्ष्यैव प्रसंगाद्यत्प्रदीयते ॥
अनर्हेषु सरागेण कामदानं तदुच्यते ॥ ५८

संसदि व्रीडया[2]ऽश्रुत्य अर्थिभ्यः प्रददाति च ॥
प्रतिदीयते च यद्दानं व्रीडादानमिति श्रुतम् ॥ ५९

दृष्ट्वा प्रियाणि श्रुत्वा वा हर्षवद्यत्प्रदीयते ॥
हर्षदानमिति प्रोक्तं[3] दानं तद्धर्मचिंतकैः[4] ॥ ६०

आक्रोशानर्थहिंसानां प्रतीकाराय यद्भवेत् ॥
दीयतेऽनुपकर्तृभ्यो भयदानं तदुच्यते ॥ ६१

प्रोक्तानि षडधिष्ठानान्यंगान्यपि च षट्च्छृणु ॥
दाता प्रतिग्रहीता च शुद्धिर्देयं च धर्मयुक् ॥ ६२

देशकालौ च दानानामंगान्येतानि षड्विदुः ॥
अपरोगी च धर्मात्मा दित्सुरव्यसनः[5] शुचिः ॥ ६३

---

१ अ प्रतौ "परं" इति स्यात् ।
(अ) शृणुः
२ (अ) ब्रीडया
३ अ प्रोक्तः
४ अ काः
५ अ व्यसनं

अनिंद्याजीवकर्मा च षड्भिर्दाता प्रशस्यते ।।
अनृजुश्रद्धानो शांतात्मा धृष्ट भीरुकः ।। ६४

असत्यसंधो निद्रालुर्दातायं तामसोऽधर्मः ।।
त्रिशुक्लः कुशवृत्तिश्च घृणालुः सकलेंद्रियः ।। ६५

विमुक्तो योनि दोषेभ्यो ब्राह्मणः पात्रमुच्यते ।।
सत्कृतिश्चान सूया च सदा शुद्धिरिति स्मृता ।। ६६

अपराबाधम क्लेशं स्वयत्नेनार्जितं धनम् ।।
स्वल्पं वा विपुलं वापि देयमित्यभि धीयते ।। ६७

तेनापि किल धर्मेण उद्दिश्य किल किंचन[२] ।।
देयं तद्धर्मयुगिति शून्ये शून्ये फलं मतम् ।। ६८

न्यायेन दुर्लभं द्रव्यं देशे कालेपि वा पुनः ।।
दानार्हौ देशकालौ तौ स्यातां श्रेष्ठौ न चान्यथा।। ६९

षाडंगानीति चौक्तानि द्वौ च पाकावतः शृणु ।।
द्वौ पाकौ दानजौ प्राहुः परत्राथ त्विहोच्यते ।। ७०

---

१ ब कृषि
२ ब किंच ।।

सद्भ्यो यद्दीयते किंचितत्परत्रोपतिष्ठति ।।
असत्सु दीयते किंचित दानमिह भुज्यते ।। ७१

[1]द्वौ पाकाविति निर्दिष्टौ प्रकारांश्चतुरः शृणु ।।
ध्रुवमाहुस्त्रिकं काम्यं नैमित्तिकमिति क्रमात् ।। ७२

वैदिको दानमार्गोऽयं चतुर्धा वर्ण्यते द्विजैः ।।
प्रपारामतडागादि सर्वकामफलं ध्रुवम् ।। ७३

तदाहुस्त्रिकमित्याहुर्दीयते यद्दिने दिने ।।
अपत्यविजयैश्वर्य स्त्री बालार्थे[2] प्रदीयते [3]।। ७४

इच्छासंस्थं च यद्दानं काम्यमित्यभिधीयते ।।
कालापेक्षं क्रियापेक्षं गुणापेक्षमिति स्मृतौ[4] ।। ७५

त्रिधा नैमित्तिकं प्रोक्तं सदा होमविवर्जितम् ।।
इति प्रोक्ताः प्रकारास्ते त्रैविध्यमभिधीयते ।। ७६

अष्टोत्तमानि चत्वारी मध्यानि विधानतः ।।
कानीयसानि शेषाणि त्रिविधत्वमिदं विदुः ।। ७७

---

१ ब प्रती इत्ययं श्लोकः नास्ति (द्वौ ...... शृणु)
२ ब बालाय
३ अ प्रदीक्षते ब च दीयते
४ ब स्मृति

गृहप्रासाद विद्याभूगो कूपप्राण[1] हाटकम ।।
एतान्युत्तमादानानि उत्तमद्रव्यैदानतः ।। ७८

अन्नारामं च वासांसि हृयप्रभृति वाहनम् ।।
दानानि मध्यमानीति मध्यमद्रव्य दानतः ।। ७९

२.— उपानच्छत्र पात्रादि दधिमध्वासनानि च ।। ८०

दीप काष्ठो पलादीनि चरमं बहुवार्षिकम् ।।
इति कानीयसान्या हुदानिनाश्नत्रयं श्रुणु ।। ८१

यद्दत्वा तप्यते पश्चादासुरं तद्वृथा मतम् ।।
अश्रद्धया यद्ददाति राक्षसं स्याद्वृथैव तत[3] ।। ८२

यच्चाक्रुश्य प्रदात्यंग दत्वा वाक्रोशति द्विजम् ।।
पैशाचं तद्वृथा दानं दान नाशास्त्रयस्त्वमी ।। ८३

इति सप्तपदैर्बद्धं दान माहात्म्यमुत्तमम् ।।
शक्तया[4] ते कीर्तितं राजन्साधुवाऽसाधुवावदन ।। ८४

---

१ अ. ब त्राण
२ अ. ब प्रतौ कनीयसानि शेषाणि त्रिविधं च मिदं विदुः ।
इत्ययं श्लोकः नास्ति ।
३ ब प्रतौ "च" इतिस्यात् ।
४ शक्यते

धर्मवर्मोवाच ।।

अद्य मे सफलं जन्म अद्य मे [१]सफलम्ं तपः ।।
[२]अद्य ते कृतकृत्यो ऽस्मि कृतःकृतिमतां वर ।। ८५

पठित्वा सफलं जन्म [३]ब्रह्मचारी यथा वृथा ।।
बहुक्लेशात्प्राप्त भार्यः सा वृथा ऽप्रियवादिनी ।। ८६

क्लेशेन कृत्वा कूपं वा स च क्षारोदको [४]वृथा ।।
बहुक्लेशैर्जन्म नीतं विना धर्मं तथा वृथा ।। ८७

एवं मे यद्वृथा नाम जातं तत्सफलं त्वया ।।
कृतं तस्मान्नमस्तुभ्यं द्विजेभ्यश्च नमोनमः ।। ८८

सत्यमाह पुरा विष्णुः कुमाराग्निविष्णु सद्मनि ।।८९

नाहं तथाद्मियजमानहविर्वितानश्च्योतदधृतप्लुतमदन्हुत भुङमुखेन ।।
यद्ब्राह्मणास्य मुखतश्चर तोनुघासं तुष्टस्यमप्यवहितैर्निजकर्मपाकैः ।। ९०

तन्मया ऽशर्मणा वापि यद्विप्रेष्व ऽप्रियं कृतम् ।।
सर्वस्य प्रभवो विप्रास्तत्क्षमैतां प्रसादये ।। ९१

त्वं च कोसि न सामान्यः प्रणाम्याहं प्रसादये ।।
आत्मानं ख्यापय मुने प्रोक्तश्चेत्य ऽब्रवं तदा ।। ९२

---

१ ब प्रतौ "तपसःफलं" इतिस्यात्

२ अ Folio No. 25 is missing ~~from~~ in M.S.A. So Slokas from 85 to 98 are missing.

३ ब प्रतौ "वृथाचारीयथा वृथा।।" इतिस्यात्

४ क्षारोदके ५ पुरामा विष्णु

नारद उवाच ।।
नारदो ऽस्मि[1] नृपश्रेष्ठ स्थानकार्थी समागतः ।।
प्रोक्तं च देहि मे द्रव्यं भूमिं च स्थानहेतवे ।। ९३

यद्यपीयं देवतानां भूमिर्द्रव्यं च पार्थिव ।।
तथापि यस्मिन्यः कालेराजा[2] प्रार्थ्यः सनिश्चितम् ।। ९४

सहीश्वरस्यावतारो भर्ता दाता ऽभयस्य[3] सः ।।
तथैव त्वामहं याचे द्रव्यशुद्धिं परीप्सया ।।
पूर्वं ममालयं देहि देयार्थं प्रार्थना ऽपरः ।। ९५

राजोवाच ।।[4]
यदित्वं नारदो विप्र राज्यमस्त्वखिलं तव ।।
अहं हि ब्राह्मणानां ते दास्यं कर्ता न संशयः ।। ९६

नारद उवाच ।।
यद्यस्माकं भवान्भक्तस्ततो कार्यं चनोवचः ।।
सर्वं यत्तेदेहि मे द्रव्यमुक्तं भुवं च मे सप्तगव्यूतिमा ऽत्राम् ।।
भूयात्त्वत्तोप्यस्य[5] ऽरक्षेति[6] सो ऽपि मेने त्वहं चिंतये चार्थशेषाम् ।। ९८

[7]इति श्री स्कांदे महापुराण एकाशीतसाहस्त्र्यां संहितायां प्रथमे माहेश्वर खण्डे कौमारिका खण्डे नारदार्जुन संवादे दानभद प्रशंसा वर्णन नाम चतुर्थो ऽध्यायः ।।

---

१ ब नारदोपि     २ ब "राजा काले" इति स्यात् ।
३ ब भयश्च     ४ ब राजा उ० ।।
५ ब भयालोपस्य     ६ ब तथेति
७ अ प्रतौ इत्ययं अंतिम पाठः नास्ति ।
ब इति श्री स्कंदपुराणे कुमारिकाखंडे चतुर्थो ऽध्यायः ।। ४ ।।